श्री कल्कि स्तोत्रं

श्री कल्कि स्तोत्रं

सुशांतोवाच |
जय हरेऽमराधीशसेवितं
तव पदांबुजं भूरिभूषणं |
कुरु ममाग्रतः साधु सत्कृतं
त्यज महामते मोहमात्मनः || 1 ||

तव वपुर्जगद्रूपसंपदा
विरचितं सतां मानसे स्थितं |
रतिपतेर्मनोमोहदायकं
कुरु विचेष्टितं कामलंपटं || 2 ||

तव यशो जगच्छोकनाशनं
मृदुकथामृतं प्रीतिदायकं |
स्मितसुधोक्षितं चंद्रवन्मुखं
तव करोत्यलं लोकमंगळं || 3 ||

मम पतिस्त्वयं सर्वदुर्जयो
यदि तवाप्रियं कर्मणाऽऽचरेत् |
जहि तदात्मनः शत्रुमुद्यतं
कुरु कृपां न चेदीदृगीश्वरः || 4 ||

महदहंयुतं पंचमात्रया
प्रकृतिजायया निर्मितं वपुः |
तव निरीक्षणाल्लीलया जग-
-त्स्थितिलयोदयं ब्रह्मकल्पितं || 5 ||

भूवियन्मरुद्वारितेजसां
राशिभिः शरीरेंद्रियाश्रितैः |
त्रिगुणया स्वया मायया विभो
कुरु कृपां भवत्सेवनार्थिनां || 6 ||

तव गुणालयं नाम पावनं
कलिमलापहं कीर्तयंति ये |
भवभयक्षयं तापतापिता
मुहुरहो जनाः संसरंति नो || 7 ||

तव जनुः सतां मानवर्धनं
जिनकुलक्षयं देवपालकं |
कृतयुगार्पकं धर्मपूरकं
कलिकुलांतकं शं तनोतु मे || 8 ||

मम गृहं पतिपुत्रनप्तृकं
गजरथैर्ध्वजैश्चामरैर्धनैः |
मणिवरासनं सत्कृतिं विना
तव पदाब्जयोः शोभयंति किं || 9 ||

तव जगद्वपुः सुंदरस्मितं
मुखमनिंदितं सुंदराननं |
यदि न मे प्रियं वल्गुचेष्टितं
परिकरोत्यहो मृत्युरस्त्विह || 10 ||

हयचर भयहर करहरशरण
खरतरवरशर दशबलदमन |
जय हतपरभव भववरनाशन
शशधरशतसमरसभरमदन || 11 ||

इति श्रीकल्किपुराणे सुशांता कृत श्री कल्कि स्तोत्रं ||